देशश्च ।) पारदः । (अस्य पर्य्याया यथा,—
"पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यञ्च रसः सूतः शिवाह्वयः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
मीनः । चोरकः । प्रस्तरविशेषः । इति मेदिनी ।
ले, ८१ ॥ चवः । इति राजनिर्घण्टः ॥ (कृमिक-
विशेषः । यथा, सुश्रुते कल्पस्थाने ६ अध्याये ।
"पूर्ब्बसूक्ताः शुक्रविषा मक्षिका ये समासतः ।
नामलक्षणभैषज्यैरष्टादश निबोध तान् ॥"
"कुलिङ्गश्चाजितश्चैव चपलः कपिलस्तथा ॥"
एतस्य दंशनेन यल्लक्षणं भवति तदुपशमनाय
च यदौषधं तद्यथा तत्रैव,—
"चपलेन भवेच्छर्द्दिर्मूर्च्छा च सह तृष्णया ।
सभद्रकाष्ठां सजटां चौद्रेण त्रिफलां लिहेत् ॥")
चपलः, त्रि, (चोपति मन्दं मन्दं गच्छतीति । चुप
+ कलः । धातोरुकारस्याकारादेशश्च ।) तरलः ।
चञ्चलः । इति मेदिनी । ले, ८८ ॥ (यथा,
आर्य्यासप्तशत्याम् । ५३० ।
"विचरति परितः कृष्णे राधायां रागचपल-
नयनायाम् ।
दशदिग्विधविशुद्धं विशिखं विदधाति विषमेषुः ॥")
दोषमनिश्चित्य वधबन्धनादेः कर्त्ता । तत्पर्य्यायः ।
विकुरः २ । इत्यमरः । ३ । १ । ४६ ॥ विकलः ।
इति शब्दरत्नावली ॥
चपला, स्त्री, (चपल + टाप् ।) लक्ष्मीः । (यथा,
माघे । ६ । १६ ।
"निलयः श्रियः सततमेतदिति
प्रथितं यदेव जलजन्म तया ।
दिवसात्ययात्तदपि मुक्तमहो
चपलाजनं प्रति न चोद्यमदः ॥"
"चपला चापलवती स्त्री कमला च ॥" इति
तट्टीकायां मल्लिनाथः ॥) विद्युत् । (यथा,
आर्य्यासप्तशत्याम् । १७६ ।
"किं पुत्रि! गञ्जनीलभ्रमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलासितगर्ज्जितदेशान्तर-
भ्रान्तीः ॥")
पुंश्चली । पिप्पली । इति मेदिनी । ले, ८८ ॥
(अस्याः पर्य्याया यथा,—
"पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
जिह्वा । इति शब्दचन्द्रिका ॥ विजया । मदिरा ।
इति राजनिर्घण्टः ॥ (आर्य्याच्छन्दोविशेषः ।
तल्लक्षणं यथा, वृत्तरत्नाकरे २ अध्याये ।
"उभयार्द्धयोर्ज्जकारौ द्वितीयतुर्य्यौ गमध्यगौ
यस्याः ।
चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन ॥")
चपेटः, पुं, (चप + घञर्थे कः । चपः सान्त्वना
चूर्णीकरणं वा तस्मै एटति गच्छतीति । इट
गतौ + अच् ।) विस्तृताङ्गुलिपाणिः । चड़ इति
चापड़ इति च भाषा । तत्पर्य्यायः । प्रतलः २
प्रहस्तः ३ । इत्यमरः । २ । ६ । ८४ ॥

चपेटी, स्त्री, भाद्रशुक्लषष्ठी । यथा, भाद्रशुक्लषष्ठ्यां
अक्षयफलप्राप्तिकामः स्नानादिकं कुर्य्यात् ।
सन्तानकामा जलसमीपे षष्ठीं पूजयेत् । षष्ठ्यै
नमः इति अरण्यषष्ठीपूजावत् । चापड़ाषष्ठी-
यम् । इति कृत्यचन्द्रिकाव्याख्या ॥ * ॥ अन्यच्च ।
"प्रसूता द्वादशे मासि सम्यग्व्यापाद्यहृद्वये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्द्दमी ज्ञेया श्रावणे लुण्ठनी मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाड़ाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मासञ्च रूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"
इति स्कन्दपुराणम् ॥
मन्थानषष्ठी इति केचित् ॥
चम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-
सकं-सेट् । उदित्वात् क्त्वावेट् ।) चमति । उ,
चमित्वा चान्त्वा । इति दुर्गादासः ॥
चम, न र उ भक्षे । इति कविकल्पद्रुमः ॥ (स्वां-
परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) न, चम्नोति ।
र वैदिकः । उ, चमित्वा चान्त्वा । इति दुर्गा-
दासः ॥
चमत्कारः, पुं, (चमत्करोतीति । कृ + अण् ।)
अपामार्गः । इति शब्दरत्नावली ॥ (चमत् +
कृ + भावे घञ् ।) चित्तविस्ताररूपः । तत्-
पर्य्यायः । विस्मयः २ । इति साहित्यदर्पणम् ॥
चमरः ३ । इति त्रिकाण्डशेषः ॥ लोकातीतार्था-
कलनेन किमेतदिति ज्ञानधाराजनने चित्तस्य
दीर्घप्रायत्वं चित्तविस्तारः । इत्येतेभ्योऽसम्भ-
वितज्ञानेन हेत्वन्तरानुसन्धाने मनोव्यापार एव
चित्तविस्तार इत्यपरे । इति साहित्यदर्पणटीका ॥
(यथा, कथासरित्सागरे । २२ । २५७ ।
"एवं सकलजगत्त्रयहृदयचमत्कारकारि-
चरितानाम् ।
स्वयमनुधावन्ति सदा कल्याणपरम्पराः पदवीम् ॥")
चमरं, क्ली, (चमरस्येदम् । चमर + अण् । अत्र
न वृद्धिः ।) चामरम् । इति मेदिनी । रे, १५२ ॥
चमरः, पुं, (चमति भक्षयतीति । चम + "अर्त्ति-
कमिभ्रमिचमीति ।" उणां । ३ । १३२ । इति
अरच् ।) चमरगौः । तत्पर्य्यायः । अजनी २
वन्यः ३ धेनुगः ४ वालधिप्रियः ५ । इति राज-
निर्घण्टः ॥ (यथा, रामायणे । २६ । ३ ।
"चमराः सृमराश्चैव ये चान्ये वनचारिणः ॥")
चमरपुच्छः, पुं, (चमरस्य पुच्छ इव पुच्छो यस्य ।)
कोकड़ः । स तु विडालविशेषः । इति राज-
निर्घण्टः ॥ चामरे क्ली च ॥
चमरिकः, पुं, (चमरमिव केशरोऽस्त्यस्य । "अत
इनिठनौ ।" ५।२।११५ । इति ठन् ।) कोविदार-
वृक्षः । इत्यमरः । २।४।२२ ॥ (पर्य्यायोऽस्य
यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डलीताम्रपुष्पश्च सन्तकः स्वल्पकेशरी ॥")

चमरी, स्त्री, (चमरस्य स्त्रीजातिः । चमर +
स्त्रियां ङीष् ।) चमरगवी । तत्पर्य्यायः । दीर्घ-
वाला २ गिरिप्रिया ३ । इति राजनिर्घण्टः ॥
(यथा, कुमारे । १ । १३ ।
"यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति वालव्यजनैश्चमर्य्यः ॥")
मञ्जरी । इति मेदिनी । रे, १५२ ॥
चमसः, पुं, क्ली, (चम्यते भक्ष्यते पीयते इति यावत्
सोमोऽस्मिन्निति । चमु भक्षणे + "अत्यवि-
चमीति ।" उणां । ३ । ११७ । इति असच् ।)
यज्ञपात्रभेदः । इति मेदिनी । से, २१ ॥ चमच्
इति भाषा ॥ (एतल्लक्षणादिकमुक्तं यथा,—
"चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः ।
त्र्यङ्गुलस्तु भवेत् स्कन्धो विस्तारश्चतुरङ्गुलः ॥
विकङ्कतमयाः श्लक्ष्णावाग्विलाश्चमसाः स्मृताः ।
अन्येभ्यो वापि वा कार्य्यास्तेषां इक्षुषु लक्षणम् ॥
होतुर्मण्डल एव स्यात् ब्रह्मणश्चतुरस्रकः ।
उद्गातश्चाश्रिः स्यात् याजमानः पृथुः
स्मृतः ॥
प्रशास्तुरवतः स्याद्रुन्तोऽच्छ ब्राह्मणशंसिनः ।
पोतुरग्रे विशाखी स्यान्नेष्टुः स्याद्विरष्टीतकः ॥
अच्छावाकस्य राजाव आग्नीध्रस्य मयूखकः ।
इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्म्मणि ।
पलाशाश्वत्थवटाश्चन्यग्रोधाश्च चमसाः स्मृताः ॥")
चमसः, पुं, (चम्यते भक्ष्यते इति । चम + असच् ।)
पर्पटः । पिष्टभेदः । लड्डुकः । इत्युणयपालः ॥
(ऋषभदेवस्य पुत्राणामन्यतमः । यथा, भाग-
वते । ५ । ४ । ११ ।
"कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥
एते भागवतधर्म्मदर्शना नव महाभागवताः ॥")
चमसी, स्त्री, (चमस + गौरादित्वात् ङीष् ।)
मुद्गमसूरादिपिष्टम् । काष्ठरचितं यज्ञपात्र-
मित्यन्ये । इति लिङ्गादिसंग्रहटीकायां भरतः ॥
"चूर्णं यत्कृष्णमाषाणां चमसी सा विधीयते ।"
इति भावप्रकाशः ॥
चमूः, स्त्री, (चमति भक्षयति शत्रून् नाशयतीत्यर्थः ।
चम + "कृषिचमितनीति ।" उणां ।१।८०। इति
ऊः ।) सेनामात्रम् । (यथा, गीतायाम् । १ । ३ ।
"पश्यैतां पाण्डुपुत्राणामाचार्य्य ! महतीं चमूम् ॥")
सेनाविशेषः । तत्र ७२६ हस्तिनः ७२६ रथाः
२१८७ अश्वाः ३६४५ पदातयः । समुदायेन
७२६० द्विशततनवत्यधिकसप्तसहस्रम् । इत्यमर-
मेदिनीकरौ ॥
चमूरुः, पुं, स्त्री, (चमतीति । चम + "खर्ज्जिपिञ्जा-
दिभ्य ऊरोलचौ ।" उणां ।४।९० । इति ऊरः ।
पृषोदरादित्वात् अत उत्वञ्च ।) हरिणविशेषः ।
इत्यमरः । २ । ५ । ६ ॥ (यथा, माघे ।१।८ ।
"चकासतं चारुचमूरुचर्म्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम् ॥")
चम्पः, पुं, (चम्पतीति । चम्प + अच् ।) कोवि-
दारवृक्षः । इति शब्दमाला ॥